शिशुपालवधेद्वितीयः सर्गः

२७५

2 पत्राणि

नं. ३१९८

शिशुपालवधः

(टीकासहित)

— ८ पत्राणि

मा कर्तृ

अपूर्ण —

क. माघः

१

॥श्री॥ यियस्समाणेनाहूतः पार्थेनाथद्विषन्मुरं॥ अभिचैद्यं प्रतिष्ठासुरासीत्कार्यद्वयाकु

लः॥१॥ गुरुकाव्यानुगां बिभ्रच्चांद्रीमभिनभः श्रियं॥ सार्द्धमुद्धवसीरिभ्यामथासावासदत्सदः॥

२॥ जाज्वल्यमाना जगतः शांतये समुपेयुषी॥ व्यद्योतिष्ट सभावेद्यामसौ नरशिखित्रयी॥३॥

रत्नस्तंभेषु संक्रांतप्रतिमास्ते चकासिरे॥ एकाकिनोपि परितः पौरुषेयवृता इव॥४॥

अध्यासामासुरुत्तुंगहेमपीठानि यान्यमी॥ तैरूहे केसरिक्रांतत्रिकूटशिखरोपमा॥५॥

गुरुद्वयाय गुरुणोरुभयोरथ कार्ययोः॥ हरिर्विप्रतिषेधं तमाचचक्षे विचक्षणः॥६॥

द्योतितांतःसभैः कुंदकुड्मलाग्रदतः स्मितैः॥ स्नपितेवाभवत्तस्य शुद्धवर्णा सरस्वती॥७॥

भवद्गिरामवसरप्रदानाय वचांसि नः॥ पूर्वरंगः प्रसंगाय नाटकीयस्य वस्तुनः॥८॥

करदीकृतभूपालो भ्रातृभिर्जित्वरैर्दिशां॥ विनाप्यस्मदलंभूष्णुरिज्यायै तपसः सुतः॥९॥ श्रीगणेशा

१

उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता ॥ समौ हि शिष्टैराम्नातौ वर्त्स्यंतावामयः स
प च ॥१०॥ न दूये सात्वतीसूनुर्यन्मह्यमपराध्यति ॥ यत्तु दंदह्यते लोकमदो दुःखाकरोति
मां ॥११॥ मम तावन्मतमिदं श्रूयतामंग वामपि ॥ ज्ञातसारोपि खल्वेकः संदिग्धे कार्यवस्तु
नि ॥१२॥ यावदर्थपदां वाचमेवमादाय माधवः विरराम महीयांसः प्रकृत्या मित
भाषिणः १३ ततः सपत्नापनयस्मरणानुशयस्फुरा ओष्ठेन रामो रामोष्ठवि
म्बचुंबनचुंचुना १४ विवक्षितामर्थविदस्तत्क्षणप्रतिसंहृतां ॥ प्रापयन्पवनव्याधे
र र्गिरमुत्तरपक्षतां ॥१५॥ घूर्णयन्मदिरास्वादमदपाटलितद्युती ॥ रेवतीवदनोच्छिष्ट
परिपूतपुटे दृशौ ॥१६॥ आश्लेषलोलुपवधूस्तनकार्कश्यसाक्षिणीं ॥ म्लापयन्न

मिमानो लैर्वनमालां मुरवानिलैः ॥ दधत्संध्यारुणव्योमस्फुरत्तारानुकारिणीः ॥ द्विषद्द्वेषो
२ परक्तांगसंगिनीः स्वेदविप्रुषः ॥१८॥ प्रोत्तुंसत्कुंडलप्रोतपद्मरागदलत्विषा ॥ कृष्णोत्तरासं
गरुचं विदधद्धौतपल्लवीं ॥१९॥ ककुभिकन्यावक्रांतर्वासलव्याधिवासया ॥ मुरवामो
२ दं मदिरया कृतामुव्याधमुद्वहन् ॥२०॥ जगादवदनच्छद्मपद्मपर्यंतपातिनः ॥ न
नद यन्मधुलिहः श्वैत्यमुदंशानांशुभिः ॥२१॥ अष्टाभिः कुलकं ॥ यदा सुदेवेनादीन
मनादीनवमीरितं ॥ वचसस्तस्य समदिक्रियाकेवलमुत्तरं ॥२२॥ नैतत्सु ख्वापि मन्ये यस्या
धु वाचो वाचातिशय्यते ॥ इंधनौघं गप्यग्निस्त्विषा नात्येति पूषणः ॥२३॥ संक्षिप्तस्याप्यतो
कंय स्यैव वाच्यास्यार्थगरीयसः ॥ सविस्तरतरा वाचो भाष्यभूता भवंतु मे ॥२४॥ विरोधिवच भ
सो मूकान् वागीशानपि कुर्वते ॥ जडानप्यनुलोमार्थप्रवाचः कृतिनां गिरः ॥२५॥ षड्गुणाः श्रीगणेश

२

शाक्तयस्तिस्रः सिद्धयश्चोदयास्त्रयः॥ गंन्धानधीत्यव्याकर्तुमितिदुर्मेधैष्यते॥२६॥स सेम
र्वकार्येशरीरेऽप्युत्सोगंस्कंधपंचकं॥ सोगनानामिवात्मान्यो नास्तिमंत्रोमहीभृतो॥२७॥
अनिर्लोठितकार्यस्य वाग्जालं वाग्मिनो वृथा॥ निमित्तादपराद्धेषोर्धानुष्कस्येव वल्गितं॥२८॥
मंत्रोयोधइवाधीरः सर्वांगैः संवृतैरपि॥ चिरंनसहतेस्थातुं परेभ्योभेदशंकया॥२९॥
आत्मोदयः परज्यानिर्द्वयंनीतिरितीयती॥ तदूरीकृत्यकृतिभिर्वाचस्पत्यंप्रतायते॥३०॥
तृप्तियोगः परेणापि नमहिम्नामहात्मनां॥ पूर्णश्चंद्रोदयाकांक्षी दृष्टांतोत्रमहार्णवः॥३१॥
संपदासुस्थिरंमन्योभवतिस्वल्पयापियः॥ कृतकृत्योविधिर्मन्येनवर्धयतितस्यतां॥३२॥
समूलघातमघ्नंतः परान्नोद्यंतिमानिनः॥ प्रध्वंसितांधतमसस्तत्रोदाहरणंरविः॥३३॥

३ विपक्षमखिलीकृत्य प्रतिष्ठा खलु दुर्लभा ॥ अनीत्वा पंकतां धूलिमुदकं नावतिष्ठते ॥३४॥
ध्रियते यावदेकोपि रिपुस्तावत्कुतः सुखं ॥ पुरः क्लिश्नाति सोमं हि सैंहिकेयोसुरद्रुहां ॥३५॥
सखा गरीयान्शत्रुश्च कृत्रिमस्तौ हि कार्यतः ॥ स्याताममित्रौ मित्रे च सहजप्राकृतावपि ॥३६॥
3 उपकर्त्रारिणा संधिर्न मित्रेणापकारिणा ॥ उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ॥३७॥
त्वया विप्रकृतश्चैद्यो रुक्मिणीं हरता हरे ॥ बद्धमूलस्य मूलं हि महद्वैरतरोः स्त्रियः ॥३८॥
त्वयि भौमं गते जेतुमरौत्सीत्स पुरीमिमां ॥ प्रोषितार्यमणं मेरोरंधकारस्तटीमिव ॥३९॥
आलप्यालमिदं बभ्रोर्यत्स दारानपाहरत् ॥ कथापि खलु पापानामलमश्रेयसे यतः ॥४०॥
विराद्ध एवं भवता विराद्धा बहुधा च नः ॥ निर्वर्त्यतेरिः क्रियया स श्रुतश्रवसः सुतः ॥४१॥
विधाय वैरं सामर्षे नरोरौ य उदासते ॥ प्रक्षिप्योदर्चिषं कक्षे शेरते तेभिमारुतं ॥४२॥ श्रीगणेश

३

मनागभ्यावृत्त्या वा कामं क्षाम्यतु यः क्षमी॥ क्रियासमभिहारेण विराध्यंतं क्षमेत कः॥४३॥ अन्यदाभू
षणं पुंसः क्षमा लज्जेव योषितः॥ पराक्रमः परिभवे वैयात्यं सुरतेष्विव॥४४॥ मा जीवन्यः परावज्ञादुःखद
ग्धोऽपि जीवति॥ तस्याजननिरेवास्तु जननीक्लेशकारिणः॥४५॥ पादाहतं यदुत्थाय मूर्धानमधिरोहति॥
स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः॥४६॥ असंपादयतः किंचिदर्थं जातिक्रियागुणैः॥
यदृच्छाशब्दवत्पुंसः संज्ञायै जन्म केवलं॥४७॥ तुंगत्वमितरा नाद्रौ नेदं सिंधावगाधता॥
अलंघनीयताहेतुरुभयं तन्मनस्विनि॥४८॥ तुल्येऽपराधे स्वर्भानुर्भानुमंतं चिरेण यत्॥
हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलं॥४९॥ स्वयं प्रणमतेऽल्पेऽपि परवायावुपेयुषि॥ नि
दर्शनमसाराणां लघुर्बहुतृणं नरः॥ ॥५०॥ तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते॥
पंचमः पंचतपसस्तपनो जातवेदसां॥ ॥५१॥ अकृत्वा हेलया पादमुच्चैर्मूर्धसु विद्विषां॥

४ कथंकारमनालंबा कीर्त्तिर्द्यामधिरोहति ॥५२॥ अंकाधिरोपितमृगश्चंद्रमा मृगलांछनः केसरी
निष्ठुरक्षिप्तमृगयूथो मृगाधिपः ॥५३॥ चतुर्थोपायसाध्ये तु रिपौ सांत्वमपक्रिया ॥ स्वेद्यमामज्व
रं प्राज्ञः को ऽंभसा परिषिंचति ॥५४॥ सामवादाः सकोपस्य तस्य प्रत्युत दीपकाः ॥ प्रतप्तस्येव सहसा
सर्पिषस्तोयबिंदवः ॥५५॥ गुणानामायथातथ्यादर्थं विप्लावयंति ये ॥ अमात्यव्यंजना राज्ञां दूष्या
स्ते शत्रुसंज्ञिताः ॥५६॥ स्वशक्त्युपचये केचित्परस्य व्यसने परे ॥ यानमाहुस्तदासीनं त्वा
मुत्थापयति द्वयं ॥५७॥ लिलंघयिषतो लोकानलंघ्यानलघीयसः ॥ यादवांभोनिधी
न्रुंधे वेलेव भवतः क्षमा ॥५८॥ विजयस्त्वयि सेनायाः साक्षिमात्रे ऽपदिश्यतां ॥ फलभाजि
समीक्ष्योक्ते बुद्धेर्भोगमिवात्मनि ॥५९॥ हते हिडंबरिपुणा राज्ञि द्वैमातुरे युधि ॥ चिरस्य

श्रीगणेश

८

त

मित्रव्यसनी सुदमोदम घोषजः॥६०॥ नीतिरापदियद्गम्यः परस्तन्मानिनो ह्रियै॥ विधुर्वि

धुंतुदस्येव पूर्णस्तस्योदयो मा यसः॥६१॥ अन्यदुच्छृंखलं सत्त्वमन्यच्छास्त्रनियंत्रितं॥ सा

मानाधिकरण्यं हि तेजस्तिमिरयोः कुतः॥६२॥ इंद्रप्रस्थगमस्तावत्कारि मासंतु चेद

यः॥ आस्माकदंतिसान्निध्याद्वामनीभूतभूरुहः॥६३॥ निरुद्धवीवधासारप्रसारा

गा इव व्रजं॥ उपरुंधंतु दाशार्हाः पुरीं माहिष्मतीं द्विषः॥६४॥ यजतां पांडवः स्वर्गमवत्विंद्र

स्तपत्विनः॥ वयं हनाम द्विषतः सर्वः स्वार्थं समीहते॥६५॥ प्राप्यतां विद्युतां संपत्संपर्कादर्करोचि

षां॥ शस्त्रैर्द्विषच्छिरश्छेदप्रोच्छलच्छोणितोक्षितैः॥६६॥ इति संरंभिणो वाणीर्बलस्यालेख्यदेव

ताः॥ सभाभित्तिप्रतिध्वानैर्भयादन्ववदन्निव॥६७॥ निशम्यताः शेषगवीरभिधातुमधोक्षजः॥

शिष्याय बृहतां पत्युः प्रस्तावमदिशद्दृशा॥६८॥ भारतीमाहितभरामथानुद्धतमुद्धवः॥ त

५ मुंध्यो तथ्या नुजवज्जगा दाम्येग दाग्र ज्ञं ॥६९॥ संप्रत्य सांप्रतं वक्तुमुत्के मुशाल्पाणिना ॥ निर्द्धारि
नेर्थे लिख्यनखलत्काखलु वाचिकं ॥७०॥ तथापि बन्मय्यपि तेगुरुत्येष गोरवं ॥ तस्यो जकक ल्टेल २
मुपैति मम जल्पतः ॥७१॥ वर्णैर्व्रूति पर्यैरेव ग्रथित स्य स्वरै रिव ॥ अनेतावाङ्मयस्याहो गेय स्यैव वि
5 चित्रता ॥७२॥ वहत्पिस्व च्छयाकाममप्रकीर्णमभिधीयते ॥ अनुज्झितार्थसंबंधः प्रबं
धो दुरुदाहरः ॥७३॥ मदीयसीमपि घुनामनल्पगुणगुंफितो ॥ प्रसारयंति कु
शला श्चित्रां वाचं पटीमिव ॥७४॥ विशेषाविदुषः शास्त्रं यत्तवो ज्ञाह्यते पुरः ॥
हेतुः परिचयस्थैर्ये वक्तुर्गुणनिकैव सा ॥७५॥ प्रज्ञोत्साहावतः स्वामी यतेता
धातुमात्मनि ॥ तौ हि मूलं समुद्देष्यंत्या जिगीषोरात्मसंपदः ॥७६॥ सापधानोंधि
यं धीराः स्वयसीरवद्वयंति यतेनानिशं निमं णास्ते ज्ञानतेजालुनय्यमं ॥७७॥ श्रीगणेश

५

स्फुट शांतिशारचंती क्ष्मा: स्लोकमेनर्विशांतिच॥ बहुस्फुटशापिरस्यल्केनस्यो यते बहिरसम
वत्॥७८॥ आरभंते ल्पमेवाज्ञा: कामंव्यग्रा भवंति च॥ महारंभा: कृतधियस्तिष्ठं
ति च निराकुला:॥७९॥ उपायमास्थितस्यापि नश्यंत्यर्था: प्रमाद्यत:॥ हंति नोप
शयस्थोपि शयालुर्मृगयुर्मृगान्॥८०॥ उद्धेतुममत्यजन्नीहां राजसु द्वादशस्व
पि॥ जिगीषुरेको दिनकृदादित्येष्विव कल्पते॥८१॥ बुद्धिशस्त्र: प्रकृत्यंगो घनसं
वृतिकंचुक:॥ चारेक्षणो दूतमुख: पुरुष: कोपि पार्थिव:॥८२॥ तेज: क्षमा वा नैकांत:
कालज्ञस्य महीपते:॥ नैकमोज: प्रसादो वा रसभावविद: कवे:॥८३॥ कृतापराधोपि
परैर्नोरेविष्कृतविक्रिय:॥ असाध्यं कुरुते कोपं प्राप्ते काले गदो यथा॥८४॥ म

दुग्धवाहितं तेजो भौमं कुमार्यां न्यकल्प्यते ॥ प्रदीपः स्नेहमादत्ते दशयाभ्यन्तरस्थया ॥ ८५ ॥
८ तंत्रावापविदा योगैर्मंडलान्यधितिष्ठता ॥ सुनिग्रहा नरेंद्रेण फणीन्द्रा इव शत्रवः ॥ ८६ ॥ क
रप्रचेयामुत्तुंगः प्रभुशक्तिं प्रथीयसीं ॥ प्रज्ञाफलं स्वहंमूलः फलत्युत्साहपादपः ॥ ८७ ॥
6 नालंबते दैष्टिकतां न निषीदति पौरुषे ॥ शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते ॥ ८८ ॥
स्थायिनोर्थे प्रवर्तंते भावाः संचारिणो यथा ॥ रसस्यैकस्य भूयांसस्तथा नेतुर्महीभृतः ॥
८९ ॥ अनल्पत्वात्प्रधानत्वाद्वंशस्येवेतरे स्वराः ॥ विजिगीषोर्नृपतयः प्रयांति परिवारतां ॥ ९० ॥
अप्यनारभमाणस्य विभोरुत्पादिताः परैः ॥ व्रजंति गुणतामर्थाः शब्दा इव विहायसः ॥ ९१ ॥
यातव्यपार्ष्णिग्राहादिमालायामधिकद्युतिः ॥ एकार्थतंतुप्रोतायां नायको नायकायते ॥ ९२ ॥

षाड्गुण्यमुपयुंजीतशक्त्यपेक्षोरसायनं ॥ भवंत्यस्यैवमंगानिस्थास्नूनिबलवंतिच ॥६३॥
स्थानेशमवतांशक्त्याव्यायामेवृद्धिरंगिनां ॥ अयथाबलमारंभोनिदानंक्षयसंपदः ॥६४॥
नदीशितास्वेदीनांभ र धांसमवमसमा ॥ निहंत्यरीनेकपदेयुउदग्रःरानिव ॥६५॥ स
मावेदिपदसावेकोजेनव्यथेद्दिराद्दृति ॥ राजयक्ष्मेवरोगाणांसमूहःसमहीभृतां ॥६६॥
संघाद्दितफलस्तेनसपक्षःपरभेदकः ॥ कार्मुकेनेवगुणिनाबाणःसंधानमेष्यति ॥६७॥
येयोन्येकालपवनशाल्वसक्तिमदुमादयः ॥ तमसस्माविल्लेपोनंपरेषमनुयायिनः ॥६८॥
उपनापंक्तुतस्तेननानाकोपवनस्थयि ॥ आशुदीपद्युतिाल्पोपिसाम्नौनेधनिवानिलः ॥६९॥
रहत्सहायःकार्योतंक्षोदीयानपिगच्छति ॥ संभूयांभोधिमभ्येतिमहान्नघानगापगा ॥७०॥

७ तस्य मित्राण्यमित्रास्ते ये च ये चोभये नृपाः ॥ अभियुक्तं त्वयैनं ते गन्तारस्त्वामतोपरे ॥१॥
मखविघ्नाय सकलमित्थमुत्थाय राजकं ॥ हन्त जातमजातारेः प्रथमेन त्वयारिणा ॥२॥
संभाव्य त्वामतिभरक्षमस्कन्धं स बान्धवः ॥ सहायमध्वरधुरां धर्मराजो विवक्षते ॥३॥
महात्मानोनुगृह्णन्ति भजमानान्रिपूनपि ॥ सपत्नीः प्रापयन्त्यब्धिं सिन्धवो नगनिम्नगाः ॥४॥
चिरादपि बलात्कारो बलिनः सिद्धयेरिषु ॥ छन्दानुवृत्तिदुःसाध्याः सुहृदो विमनीकृताः ॥५॥
मन्यसेरिवधः श्रेयान्प्रीतये नाकिनामपि ॥ पुरोडाशभुजामिष्टमिष्टं कर्तुमलन्तरां ॥६॥ अ-
मृतं नाम यत्सन्तो मन्त्रजिह्वेषु जुह्वति ॥ शोभैव मन्दरक्षुब्धक्षुभिताम्भोधिवर्णना ॥७॥
सहिष्ये शतमागांसि सूनोस्त इति यत्त्वया ॥ प्रतीक्ष्यं तत्प्रतीक्षायै पितृष्वस्रे प्रतिश्रुतं ॥८॥

श्रीगणेश

ना तीक्ष्णतां सेतुरां बुद्धिः कर्मशांते प्रतापवन्॥ नोपतापि मनः सोष्मवागेकावाग्मिनः सतः॥ १०॥ स्व
यं कृताप्रसादस्य तस्याऽप्रो भानुमानिव॥ समयावधिमप्राप्य नानोयालंभवामपि॥ ११॥
कृत्वा कृत्याविदस्तीर्थैरंतः प्रणिधयः पदं॥ विदांकुर्वंतु महतस्तलं विद्विषदं भसः॥ १२॥
२ अनुत्सेकपदन्यासा सद्वृत्तिः सन्निबंधना॥ शास्त्रविद्येव नो भाति राजनीतिरपस्पशा॥ १३॥
अज्ञातदोषैर्दोषज्ञैरुद्दृष्ट्योभयवेतनैः॥ भेद्याः शत्रोरभिव्यक्तशासनैः सामवायिकाः॥ १४॥
उपध्याविधासिकतीरः पुरी माजातशात्रवी॥ राजन्यकान्युपायज्ञैरेकार्थानि चरैस्तव॥ १४॥
सविशेषं सुतेपांडोर्भक्तिं भवति तन्वति॥ वैरायितारस्तरलाः स्वयं मत्सरिणः परे॥ १५॥
यदुहात्म विदोविपक्षमध्ये सहसंहर्द्धि युजोपि भूभुजस्युः॥ बलिपुष्टकुलादिवा
न्यपुष्टैः पृथगस्मादचिरेण भाविनो तैः॥ १६॥ सहजचापलदोषसमुद्धतश्चलित

दुर्बलपक्षपरिग्रहः ॥ तवदुरासदवीर्यविभावसो शलभतां लभतामसुहृद्गणः ॥
८ १७ ॥ इति विशकलितार्थामौद्धवीं वाचमेनामनुगतनयमार्गामर्गलां दुर्नयस्य ॥
नरकरिपुरुदस्थादुच्चकैरुन्नतोरस्थलनियतनिषण्णश्रीश्रुतांसुश्रुवांसः ॥ न
४० ॥ १८ ॥ इति श्रीशिशुपालवधे महाकाव्ये माघे मंत्रनिर्णयो नाम द्वितीयः सर्गः ॥
कौबेरदिग्भागमपास्य मार्गमागस्त्यमुष्णांशुरिवावतीर्णः ॥ अपेतयुद्धाभिनिवेशसौम्यो
हरिर्हरिप्रस्थमथ प्रतस्थे ॥ १ ॥ जगत्पवित्रैरपि तं न पादैः स्प्रष्टुं जगत्पूज्यमयुज्यतार्कः ॥ यतो
बृहत्पार्वणचंद्रचारु तस्यातपत्रं बिभरांबभूवे ॥ २ ॥ मृणालसूत्रामलमंतरेण स्थितश्चलच्चा-
मरयोर्द्वयं सः ॥ भेजेऽभितः पातुकसिद्धसिंधोरभूतपूर्वां श्रियमंबुराशेः ॥ ३ ॥ बिभाभि
श्रीगणे
८ ये